**2019**

**M.A.**

**2nd Semester Examination**

# SANSKRIT

**Paper : SAN-203**

**Full Marks : 40** **Time : 2 Hours**

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः।

1. (क) यथेच्छं प्रश्नद्वयं समाधेयम् 2×2=4

(i) नैषधचरितमहाकाव्ये कति सर्गाः समुपलभ्यन्ते? अस्य प्रसिद्धः टीकाकारः कः?

(ii) 'नैषधचरितम्' – इति महाकाव्यस्य उपजीव्यत्वं किमस्ति? प्रधानश्च रसः कः?

(iii) 'अमुष्य विद्या रसनाग्रनर्त्तकी त्रयीव नीताङ्ग – गुणेन विस्तरम्' – इत्यत्र 'अङ्गगुणेन' इति पदेन उपमापक्षे कोऽर्थः? उपमेयपक्षे च कोऽर्थः?

*[ Turn Over ]*

(iv) 'कामप्रसरावरोधिनीम्' इति पदस्य समासं निर्णयतु।

(क) यथेच्छं प्रश्नद्वयं समाधेयम् — 2×2=4

(i) मेघदूते कविना कीदृशं मंगलाचरणं कृतम्?

(ii) मेघदूते प्रयुक्तः छन्दोविशेषः कः? तस्य छन्दसः लक्षणं लिखत।

(iii) कस्मै स्वागतं वचनं व्याजहार?

(iv) कालिदासमते वित्तेशानां एकमात्रम् अवस्था का अस्ति?

2. प्रतिविभागात् कयोश्चिद् द्वयोर्व्याख्या कार्या :

विभागः 'क' 2×4=8

(i) निपीय यस्य क्षितिरक्षिणः कथां
तथाद्रियन्ते न बुधाः सुधामपि।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्ज्वलः।।

(ii) निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिवृष्टयः।
न तत्यजुर्नूनमनन्यविश्रमाः
प्रदीपभूपालमृगीदृशां दृशः।।

(iii) श्रियास्य योग्याहमिति स्वमीक्षितुं
करे तमालोक्य सुरूपया धृतः।
विहाय भैमीमपदर्पया कया
न दर्पणः श्वासमलीमसः कृतः।।

(iv) मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दय-
न्नहो विधे त्वां करुणा रुणद्धि न।।

विभागः 'ख' 2×4=8

(i) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

(ii) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

[ Turn Over ]

(iii) विद्युद्वन्तं ललितवनिताः सेन्द्रचाप सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः।।

(iv) मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः।।

3. प्रश्नद्वयस्योत्तरं प्रदेयम् : 2×8=16

(क) 'नैषधे पदलालित्यम्' इति नैषधचरितदिशा वर्ण्यताम्।

अथवा

नलं प्रति दमयन्त्याः पूर्वरागः नैषधचरितमवलम्ब्य वर्ण्यताम्।

(ख) 'मार्गं तावच्छृणु' - केन कं प्रति उक्तिरेषा कृता? मेघदूतदिशा तत्रोक्तस्य मार्गस्य वर्णना कार्या।

अथवा

मेघदूतमनुसृत्य अलकायाः शोभा समुपवर्ण्यताम्।